वैयाकरणसिद्धान्तकौमुदी

समासप्रकरणम् - तत्पुरुषः (७)

१४.०४.२०१२

कुत्सितानि कुत्सनैः (२.१.५३)

- पदद्वयम् ।
- कुत्स्यमानानि कुत्सनैः सह प्राग्वत् । (समानाधिकरणेन समस्यन्ते, स तत्पुरुषः इत्यर्थः)
- वैयाकरणः खसूचिः वैयाकरणखसूचिः ।
- यः प्रक्रियां पृष्टस्सन् प्रश्नं विस्मारयितुम् आकाशं दर्शयति पश्यति वा स एवमुच्यते । अत्र वैयाकरणः प्रक्रियाविस्मरणात् निन्द्यः । खसूचनं निन्दाहेतुः ।
- मीमांसकदुर्दुरूटः ।
- यो मीमांसाम् अधीत्य अन्यथा जानानो दुराक्षेपं करोति स एवमुच्यते ।
- विशेष्यस्य पूर्वनिपातार्थं सूत्रम् । अन्यथा विशेषणस्य पूर्वनिपातः स्यात् ।

पापाणके कुत्सितैः (२.१.५४)

- पदद्वयम् । पाप-अणके, कुत्सितैः ।
- पूर्वसूत्रापवादः ।
- पापनापितः ।
- पापम् अस्य अस्तीति पापः । पापवान् इत्यर्थः ।
- अणककुलालः ।
- अणकशब्दस्य कुरूपी इत्यर्थः ।

उपमानानि सामान्यवचनैः (२.१.५५)

- पदद्वयम् ।
- सामान्यः उपमानोपमेयसाधारणशब्दः, तद्वाचकाः शब्दाः सामान्यवचनाः ।
- घन इव श्यामः घनश्यामः ।
- इह पूर्वपदं तत्सदृशे लाक्षणिकम् इति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते ।
- पूर्वनिपातनियमार्थं सूत्रम् ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (२.१.५६)

- पदत्रयम् । उपमितम्, व्याघ्रादिभिः, सामान्य-अप्रयोगे ।
- उपमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्य अप्रयोगे सति ।
- विशेष्यस्य पूर्वनिपातार्थं सूत्रम् ।
- पुरुषः व्याघ्रः इव पुरुषव्याघ्रः ।
- ना सोम इव नृसोमः ।

- व्याघ्रादिगणः - व्याघ्र, सिंह, ऋक्ष, ऋषभ, चन्दन, वृक, वृष, वराह, हस्तिन्, तरु, कुञ्जर, रुरु, पृषत्, पुण्डरीक, पलाश, कितव ।
- व्याघ्रादिराकृतिगणः ।
- तेन मुखपद्मम्, मुखकमलम्, करकिसलयम्, पार्थिवचन्द्रः इत्यादि ।
- सामान्याप्रयोगे किम् - पुरुषो व्याघ्र इव शूरः ।

विशेषणं विशेष्येण बहुलम् (२.१.५७)

- पदत्रयम् ।
- भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् ।
- नीलम् उत्पलं नीलोत्पलम् ।
- बहुलग्रहणात् क्वचिन्नित्यम्, कृष्णसर्पः ।
- क्वचिन्न, रामो जामदग्न्यः ।

- शब्दाः चतुर्विधाः - जातिवाचकाः, गुणवाचकाः, क्रियावाचकाः, संज्ञावाचकाः ।

- संज्ञाशब्दाः सर्वदा विशेषणसमर्पकाः, स्वभावात् ।
- उदा: कैलासपर्वतः, अयोध्यानगरी ।

- गुणक्रियाशब्दसमभिव्याहारे जातिशब्दः विशेष्यसमर्पक एव ।
- उदा : नीलोत्पलम्, पाचकब्राह्मणः ।

- गुणशब्दयोः परस्परसमभिव्याहारे विशेषणविशेष्यभावे कामचारः ।
- उदा: खञ्चकुब्जः, कुब्जखञ्जः ।

- क्रियाशब्दयोः परस्परसमभिव्याहारे विशेषणविशेष्यभावे कामचारः ।
- उदा: पाचकपाठकः, पाठकपाचकः ।

- गुणक्रियाशब्दयोः परस्परसमभिव्याहारे विशेषणविशेष्यभावे कामचारः ।
- खञ्जपाचकः, पाचकखञ्जः ।

- सामान्यजातिविशेष्यजातिशब्दयोः समभिव्याहारे विशेषजातिः विशेषणम् ।
- उदा: आम्रवृक्षः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च (२.१.५८)

- द्विपदात्मकं सूत्रम् । पूर्व-अपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराः, च ।
- पूर्वनिपातनियमार्थमिदम् ।
- पूर्ववैयाकरणः ।
- अपराध्यापकः ।

अपरस्यार्धे पश्चभावो वक्तव्यः (वा)

- अपरश्च असौ अर्धश्च पश्चार्धः ।

- कथम् 'एकवीरः' इति ।
- 'पूर्वकालैक..' इति बाधित्वा परत्वादनेन समासे 'वीरैकः' इति हि स्यात् ।
- बहुलग्रहणाद् भविष्यति ।

श्रेण्यादयः कृतादिभिः (२.१.५९)

- पदद्वयम् ।
- श्रेण्यादयः कृतादिभिः समानाधिकरणैः समस्यन्ते, स तत्पुरुषः ।
- 'श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्' ।
- अश्रेणयः श्रेणयः कृताः श्रेणिकृताः ।
- शिल्पेन पण्येन वा जीविनां समूहः श्रेणिः ।
- पूर्वं शिल्पेन पण्येन वा जीवितुम् असमर्थाः इदानीं तेन जीवितुं समर्थाः कृताः इत्यर्थे समासः ।

क्तेन नञ्विशिष्टेनानञ् (२.१.६०)

- पदत्रयम् । क्तेन, नञ्-विशिष्टेन, अनञ् ।
- नञ्विशिष्टेन क्तान्तेन अनञ् क्तान्तं समस्यते ।
- कृतं च तदकृतं च कृताकृतम् ।

शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम् (वा)

- शाकप्रियः पार्थिवः शाकपार्थिवः ।
- आदौ शाकः प्रियः यस्य सः शाकप्रियः इति बहुव्रीहिः । ततः शाकप्रियश्चासौ पार्थिवश्च इति बहुव्रीहिगर्भो विशेषणसमासः।
- तत्र पूर्वखण्डे बहुव्रीहौ उत्तरपदस्य प्रियशब्दस्य लोपः ।

- देवपूजको ब्राह्मणः देवब्राह्मणः ।

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः (२.२.६१)

- पदद्वयम् । सत्-महत्-परम-उत्तम-उत्कृष्टाः, पूज्यमानैः ।
- पूर्वनिपातनियमार्थं सूत्रम् ।
- सन् वैद्यः सद्वैद्यः ।
- चिकित्साशास्त्रकूलङ्कषज्ञानत्वं सत्त्वम् । तेन वैद्यस्य पूजा गम्यते ।
- महान् वैयाकरणः महावैयाकरणः ।
- वक्ष्यमाणेन महत आकारः ।

- पूज्यमानैः किम् - उत्कृष्टो गौः ।
- पङ्काद् उद्धृतः इत्यर्थः ।